# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ६९

श्रुत्वा तं भीमनिर्ह्रादं शक्राशनिसमस्वनम् ।
वीक्षमाणा दिशः सर्वा दुद्रुवुर्वानरर्षभाः ॥ १॥

तानुवाच ततः सर्वान्हनूमान्मारुतात्मजः ।
विषण्णवदनान्दीनांस्त्रस्तान्विद्रवतः पृथक् ॥ २॥

कस्माद्विषण्णवदना विद्रवध्वं प्लवङ्गमाः ।
त्यक्तयुद्धसमुत्साहाः शूरत्वं क्व नु वो गतम् ॥ ३॥

पृष्ठतोऽनुव्रजध्वं मामग्रतो यान्तमाहवे ।
शूरैरभिजनोपेतैरयुक्तं हि निवर्तितुम् ॥ ४॥

एवमुक्ताः सुसङ्क्रुद्धा वायुपुत्रेण धीमता ।
शैलशृङ्गान्द्रुमांश्चैव जगृहुर्हृष्टमानसाः ॥ ५॥

अभिपेतुश्च गर्जन्तो राक्षसान्वानरर्षभाः ।
परिवार्य हनूमन्तमन्वयुश्च महाहवे ॥ ६॥

स तैर्वानरमुख्यैस्तु हनूमान्सर्वतो वृतः ।
हुताशन इवार्चिष्मानदहच्छत्रुवाहिनीम् ॥ ७॥

स राक्षसानां कदनं चकार सुमहाकपिः ।
वृतो वानरसैन्येन कालान्तकयमोपमः ॥ ८॥

स तु शोकेन चाविष्टः क्रोधेन च महाकपिः ।
हनूमान्रावणि रथे महतीं पातयच्छिलाम् ॥ ९॥

तामापतन्तीं दृष्ट्वैव रथः सारथिना तदा ।
विधेयाश्व समायुक्तः सुदूरमपवाहितः ॥ १०॥

तमिन्द्रजितमप्राप्य रथस्थं सहसारथिम् ।
विवेश धरणीं भित्त्वा सा शिलाव्यर्थमुद्यता ॥ ११॥

पतितायां शिलायां तु रक्षसां व्यथिता चमूः ।
तमभ्यधावञ्शतशो नदन्तः काननौकसः ॥ १२॥

ते द्रुमांश्च महाकाया गिरिशृङ्गाणि चोद्यताः ।
चिक्षिपुर्द्विषतां मध्ये वानरा भीमविक्रमाः ॥ १३॥

वानरैर्तैर्महावीर्यैर्घोररूपा निशाचराः ।
वीर्यादभिहता वृक्षैर्व्यवेष्टन्त रणक्षितौ ॥ १४॥

स्वसैन्यमभिवीक्ष्याथ वानरार्दितमिन्द्रजित् ।
प्रगृहीतायुधः क्रुद्धः परानभिमुखो ययौ ॥ १५॥

स शरौघानवसृजन्स्वसैन्येनाभिसंवृतः ।
जघान कपिशार्दूलान्सुबहून्दृष्टविक्रमः ॥ १६॥

शूलैरशनिभिः खड्गैः पट्टसैः कूटमुद्गरैः ।
ते चाप्यनुचरांस्तस्य वानरा जघ्नुराहवे ॥ १७॥

सस्कन्धविटपैः सालैः शिलाभिश्च महाबलैः ।
हनूमान्कदनं चक्रे रक्षसां भीमकर्मणाम् ॥ १८॥

स निवार्य परानीकमब्रवीत्तान्वनौकसः ।
हनूमान्संनिवर्तध्वं न नः साध्यमिदं बलम् ॥ १९॥

त्यक्त्वा प्राणान्विचेष्टन्तो राम प्रियचिकीर्षवः ।
यन्निमित्तं हि युध्यामो हता सा जनकात्मजा ॥ २०॥

इममर्थं हि विज्ञाप्य रामं सुग्रीवमेव च ।
तौ यत्प्रतिविधास्येते तत्करिष्यामहे वयम् ॥ २१॥

इत्युक्त्वा वानरश्रेष्ठो वारयन्सर्ववानरान् ।
शनैः शनैरसन्त्रस्तः सबलः स न्यवर्तत ॥ २२॥

स तु प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवः ।
निकुम्भिलामधिष्ठाय पावकं जुहुवे न्द्रजित् ॥ २३॥

यज्ञभूम्यां तु विधिवत्पावकस्तेन रक्षसा ।
हूयमानः प्रजज्वाल होमशोणितभुक्तदा ॥ २४॥

सोऽर्चिः पिनद्धो ददृशे होमशोणिततर्पितः ।
सन्ध्यागत इवादित्यः स तीव्राग्निः समुत्थितः ॥ २५॥

अथेन्द्रजिद्राक्षसभूतये तु

जुहाव हव्यं विधिना विधानवत् ।
दृष्ट्वा व्यतिष्ठन्त च राक्षसास्ते
महासमूहेषु नयानयज्ञाः ॥ २६ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com